अप्रैल तः जुलाईः २०२५ पर्यन्तम्
चैत्र-शुक्ल-चतुर्थीतः श्रावण-शुक्ल-सप्तमी-पर्यन्तम्
(वैक्रमाब्द्-२०८२)

RNI
DELSAN/2013/50379

ISSN:2347-1565

# संस्कृत-चन्द्रिका

## मासिकी संस्कृत-बालपत्रिका

वर्षम्-१२ संयुक्ताङ्कः-९-१२

सम्पादकः
शैलेन्द्रकुमारसिंहः
सचिवः

एक साहित्यिक त्रैमासिक शोध पत्रिका

एवं

समकालीन साहित्य के रचनात्मक मूल्यांकन की जीवन्त प्रस्तुति

तथा

सम्पूर्ण देश के प्रसिद्ध साहित्य-साधकों के साथ ही शोध छात्रों एवं नवोदित प्रतिभाओं की सशक्त लेखनी की संयुक्त प्रस्तुति

# "संस्कृत मञ्जरी"

(आई.एस.एस.एन-2278-8360)

संस्कृत भाषा और साहित्य के प्रचार-प्रसार हेतु सतत प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा प्रकाशित एक ऐसी सम्पूर्ण साहित्यिक पत्रिका जो सहज मानवीय संवदेनाओं, शोध-निबन्धों तथा उदात्त जीवन-मूल्यों का अनूठा संगम और प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।

मूल्यः- एक प्रति रु. 25/- मात्र, वार्षिक सदस्यता शुल्क रु.100/- मात्र

सुरुचि सम्पन्न स्वस्थ एवं सकारात्मक अभिव्यक्ति की संवाहिका

# "संस्कृत मञ्जरी"

के स्थायी अध्येता बनें।

आज ही अपना वार्षिक सदस्यता शुक्ल दिल्ली संस्कृत अकादमी के नाम से दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट अथवा अकादमी के बैंक खाते सं. 0170104000256 2285, आई.एफ.सी. कोड- IBKL 0000170 (IDBI BANK- Preet Vihar) में ऑन लाईन भेज कर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।

पत्र व्यवहार का पता -

सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार

प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५

दूरभाष सं.- ०११-२०९२०३६३

ISSN-2347-1565

मूल्यम्- ₹25 रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

अप्रैल तः जुलाई २०२५ पर्यन्तम्

वर्षम्-१२-संयुक्ताङ्कः-९-१२ (वै.-२०८१)

(चैत्र-शुक्ल-चतुर्थीतःश्रावण-शुक्ल-सप्तमी-पर्यन्तम्)

सम्पादकः
शैलेन्द्रकुमारसिंहः
सचिवः

सहायकसम्पादकः
प्रद्युम्नचन्द्रः


| क्र.सं. | अनुक्रमणिका | | पृष्ठ-संख्या |
|---|---|---|---|
| १. | सम्पादकीयम् | | III |
| २. | विनायकवन्दनम् | डॉ. देवीसहायपाण्डेयः | १ |
| ३. | वाणीवन्दना | डॉ. देवीसहायपाण्डेयः | २ |
| ४. | भारतराष्ट्ररत्नम् | प्रो. चौडूरि उपेन्द्ररावः | ५ |
| ५. | बालगझलगीतिः (अदादिगणशिक्षणम्) | डॉ. हर्षदेवमाधवः | ७ |
| ६. | कुत्र (सप्तमी विभक्तिशिक्षणम्) | डॉ. हर्षदेवमाधवः | ८ |
| ७. | कस्मात् किम् (बालगीतिः) | डॉ. हर्षदेवमाधवः | ८ |
| ८. | प्रिये! जन्मवारे शुभशंसनानि | डॉ. युवराजभट्टराई | ९ |
| ९. | ध्वजो मम प्रियः | डॉ. प्रीतिआर.पुजारा | ११ |
| १०. | मेघो वर्षतु | डॉ. प्रीतिआर.पुजारा | १२ |
| ११. | एका विमानदुर्घटना | श्री सुमन ललितः | १३ |
| १२. | बाबा वैद्यनाथः च श्रावणमासस्य माहात्म्यम् | डॉ. धनञ्जसकुमारमिश्रः | १४ |
| १३. | संस्कृतसाहित्ये पर्यावरणरक्षोपायाः | डॉ. आभा झा | १५ |
| १४. | कर्मणा लभ्यते फलम् | डॉ. आभा झा | १८ |
| १५. | कर्मवीरो विजयते | डॉ. आभा झा | १९ |
| १६. | विद्यायाः महत्त्वम् | डॉ. लता विगः | २० |
| १७. | सरलता-श्रेष्ठं भूषणम् | डॉ. अञ्जू बाला | २१ |
| १८. | सत्यनिष्ठा | श्री ओम् प्रकाशः ठाकुरः | २२ |
| १९. | बुद्धिचातुर्यम् | श्री ओम् प्रकाशः ठाकुरः | २३ |
| २०. | यत् स्वार्थे तत् एव परेषां कृते | श्रीमती सरोज गुलाटी | १८ |
| २१. | सत्यवादी-हरिश्चन्द्रः | श्रीमती प्रकाश कौरः | २६ |
| २२. | प्रतीक्षायाः पुस्तके | डॉ. धनञ्जसकुमारमिश्रः | २८ |


दिल्ली संस्कृत अकादमी

(राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः)

DELHI SANSKRIT ACADEMY

(Govt. of N.C.T. , Delhi)

ई-पत्रिका

## प्रकाशक:

सचिव:

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकार:

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-110005

दूरभाष: - 011-23635592, 23637798


## सदस्यताशुल्कम्

| | | |
|---|---|---|
| प्रति-अङ्कम् | : | ₹25 रूप्यकाणि |
| वार्षिकम् | : | ₹250 रूप्यकाणि |


ISSN : 2347-1565



©दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकार:

©Delhi Sanskrit Academy, Govt. of N.C.T of Delhi


शुल्कप्रदानप्रकार:

बैंकधनादेश: (डी०डी०), डाकधनादेश: अन्तरर्जालमाध्यमेन (online) अथवा सी०टी०सी० चैक माध्यमेन

(दिल्लीसंस्कृतअकादमीपक्षे)

Mode of payment:
Demand Draft, Online or by CTC Cheque
( In favour of Delhi Sanskrit Academy)


E-mail Id : sanskritpatrika.dsa@gmail.com
sanskritprakashan.dsa@gmail.com
Website : www.sanskritacademy.delhi.gov.in

# सम्पादकीयम्

**अयि गीर्वाणवाणीसमुपासकाः सुहृदयाः!**

बालसाहित्यं बालकानां मनस्सु रोचकत्वस्य अतिरिक्तं बालकानां मानसिकक्षमता-विकासं कृत्वा तेषां पठनं प्रति प्रेरयति, तेषु नैतिकमूल्यानां जागरणं करोति च। अनेन बालानां कल्पनाशक्तिः, सृजनशीलता भाषाकौशलं च वर्धते। बालसाहित्यं साहित्यज्ञानस्य मार्गप्रशस्तं करोति, बालकेषु सशक्तीकरणस्य भावञ्चोतपादयति। यद्यपि बालसाहित्यलेखनस्य विधा अतीव पुरातना वर्तते तथापि हितोपदेशः, पञ्चतन्त्रं, कथासरित्सागरः, नीतिशतकमं च अस्याः विधायाः मौलिकग्रन्थत्वेन विशेषभूमिकां निर्वहन्ति। एतां भावनां मनसि कृत्वा दिल्लीसंस्कृताकादमी नियमितरूपेण बालसाहित्युपेतां संस्कृतचन्द्रिकां बालपत्रिकारूपेण प्रकाशयति।

संस्कृताध्येतृणां विद्यार्थीनां समक्षं संस्कृतचन्द्रिका-मासिकी-बालपत्रिकायाः द्वादशतममवर्षस्य अप्रैलतः जुलाई २०२५ पर्यन्तमम् प्रकाशितः संयुक्तांकः(९-१२) सर्म्पयते। संयुक्तांकेऽस्मिन् डॉ. देवीसहायपाण्डेयस्य कतिपयाः 'लघुकाव्यांजलिः', प्रो. चौडूरीउपेन्द्ररावस्य कविता 'भारतराष्ट्ररत्नम्', डॉ. हर्षदेवमाधवस्य कतिपयाः 'बालगीतिकाः', डॉ. युवराजभट्टराई रचिता कविता 'प्रिये! जन्मवारे शुभाशंसनानि', डॉ. प्रीतिआर. पुजारा महोदयानां द्वे लघुकविते, श्रीसुमनललितमहोदयस्य एकः प्रसंगः, डॉ. धनंजयकुमारमिश्रस्य बालालेखः 'श्रावणस्य माहात्म्यम्', डॉ. आभाझामहोदयानां त्रिस्रः रचनाः यासां एकः आलेखः एका कथा तथा एकः संवाद प्रसंगः वर्तते, डॉ. लताविगस्य लघुकथा 'विद्यायाः महत्त्वम्', डॉ. अंजूबाला महोदयानां लेखः 'सरलता श्रेष्ठं भूषणम्' इत्यादयः रचनाः प्रकाशिता सन्ति। सर्वाः बालरचनाः विद्यार्थीनां जिज्ञासूपाठकानां कृते अतीव रोचकाः संस्कृते रुचिवर्धकाः वर्तन्ते। लेखकैः अपि अनुरोधः क्रियते यत् बालकेषु सृजनशीलता-भाषाकौशलं च वर्धयितुं नूतनानि लेखनानि प्रेषयन्तु। आशासे बालपत्रिकेयं बालकैः सोत्साहं च पठिष्यत इति।

**शकाब्दः** - १९४७ (आषाढ-शुक्ल-एकादशी)

**भावत्कः**
**शैलेन्द्रकुमारसिहः**
**सचिवः**

# विनायकवन्दनम्

-डॉ. देवीसहाय पाण्डेयः

देवविनायक सिद्धिविधायक देववृन्दवन्दिताखिलेश्वर ।
विघ्नविटपमुन्मूलनदक्ष हे करिवरवदनवंद्यविघ्नेश्वर ॥
एकदन्त हे मङ्गलमूर्ते योजय लोकमङ्गले काव्यम् ।
प्रेरय सत्त्वशीलसौन्दर्यं गणतन्त्रेऽस्मिन् सदा गणेश्वर ॥
भूयाद् भूयो भारतमेतज्जगद्गुरोगौरवगुणयुक्तम् ।
सुरभारतीं प्रचारय विश्वे विघ्नं नाशय हे विघ्नेश्वर ॥



# कवित्तछन्दः

वंद्यमानो भुवनेषु वन्दनविलिप्तभालो ।
सिद्धेः सदनमस्ति सिन्धुरवदनमस्य ॥
दोषदुःखदारिद्र्यदुरितदावदावानलो ।
मूलमुन्मूलयति घोरविघ्नविटपस्य ॥
कष्टकदली वनानि सद्यमेव खण्डयति ।
ऋद्धिसिद्धिवृद्धिं करोति गृहे सेवकस्य ॥
वन्दे चरणारविन्दौ गणनायकस्य तस्य ।
सर्वमङ्गलप्रदायकस्य गौरीनन्दनस्य ॥
गौरीनन्दं प्रथितचरितं विश्ववंद्यं विशेषम् ।
सर्वारम्भे सकलविबुधेष्वग्रगण्यं परेशम् ॥
विघ्नव्यूहं कदनकुशलं दुःखदोषानशेषम् ।
वन्दे सेव्यं दुरितदरणं देवदेवं गणेशम्॥
गौरीसूनुः शशिधरसुतः पूजितश्चाग्रगण्यः ।
वक्रस्तुण्डः कलभवदनो वन्दनैर्लिप्तभालः ॥
यो विघ्नेशो विकटविटपोन्मूलको विघ्नकस्य ।
नो विघ्नेभ्यो गणपतिरेवं सर्वदा पातु देवः ॥



## वाणीवन्दना



रजतधवलवर्णं कुन्दकल्पं शरीरम् ।
विलसति वरवीणादण्डमेके करे च।
सरसिजमिव रम्ये मञ्जुहंसाधिरूढे ।
वितरयमतिमेवं काव्यशक्तिः सुमातः ॥

## कवित्तछन्दः



शारदे विशारदे मरालवाहने! सदा हि
मञ्जुगीतिलेखनाय देहि मे मतिं शुभे।
अनेन गीतिलेखनेन बालवृद्धमोदनेन
ज्ञानभालमण्डनाय देहि मे गतिं शुभे ॥
भवेत्तु गीतगुञ्जनं सुकाव्यनन्दने वने
जने-जने भवेत्तु चेतनाप्रसारणं शुभे ॥
लभेत भारतं पुनर्जगद्गुरोर्गौरवम् ।
भवेत्तु शीघ्रमेवमज्ञतानिवारणं शुभे॥
विद्याबुद्धिं देहि शारदे हृदये शुद्धिं देहि शारदे।
काव्यकलासङ्गीतसाधने भावे वृद्धिं देहि शारदे ॥
कमलासने मरालवाहने वीणापुस्तकधरे शोभने ।
वरदे सौम्यानने सौख्यदे सकलसमृद्धिं देहि शारदे ॥
नव्यजागरणयुगमायातं युगं हि नव्यचेतनास्नातम् ।
बालविहगकण्ठेषु नवस्वरगीते सिद्धिं देहि शारदे ॥

## फागछन्दः

वरदायिनि हे वीणापाणि देवि कष्टान् समस्तान्निवारय कृपां विस्तारय ॥
राजति रजतकिरीटो भाले
आसीना मृदुमञ्जु मराले।
ज्ञानप्रभां प्रसारय।
वरवल्लकी विराजति हस्ते
मनोहरः सुस्मितोऽधरस्ते।
देवैर्वन्दिता वाणिदेवि मम बुद्धेर्जाड्यं हारय कृपां विस्तारय ॥

आगच्छतु मम हृदि सरोवरे
हंसवाहने विचरत्वजिरे।
मां कष्टेभ्यो वारय।
सर्वसमर्थे मङ्गलकारिणि
घोरानर्थसमूहविदारिणि ।
कल्याणं प्रकुरु कल्याणिदेवि
अज्ञानान्मामुद्धारय कृपां विस्तारय ॥



रसभावाद्यःकाव्यविधानम्
छन्दसामखिलानां ज्ञानम्।
मयि करुणां प्रसारय।
कविदीपः शरणे ह्यायातः
याचे करुणाभिक्षां मातः।
आशीषं देहि वीणापाणि देवि किङ्करमिव
मां सुविचारय कृपा विस्तारय॥
कुन्देन्दु वृन्देन न क्रियते क्रियते तनुतन्वा तु दिव्याद्युतिर्या।
सत्यमिदंकथयामि सुमातस्त्वदृते दासस्य कापि गातिर्ना॥
यावन्न लब्धा त्वदीया कृपा भवतीति समर्था तु काव्ये मतिर्ना।
याचते ते करुणाकिरणं कवितालतिकाकलिकेव कृतिर्या॥
कवितासवितामवतारय मे तमसा भरितस्य गृहस्य तले।
प्रतिभाप्रभया परिपूरयितुं मयि देहि बलं निखिलं विपुले॥
अमलेन कृपासलिलेन सदा हर साड्यमलं सकलं विमले।
जननीव सदा प्रतिपालय मे, भर भावधनं हृदये विकले॥

- लवकुश नगरम्, रामघाट
अयोध्या, उत्तर प्रदेश

# भारतराष्ट्ररत्नम्

-प्रो० चौडूरि उपेन्द्र रावः

१. त्यागेन धैर्येण पराक्रमेण
दानेन चालङ्कृतजीवनेन।
वीरैरनन्तैर्विजितारिवृन्दै-
र्विभाति मे भारतराष्ट्ररत्नम् ॥

२. नदीभिरुत्तुङ्गतरङ्गदीप्तै
स्त्रिभिस्समुद्रैः परिवेष्टितेयम्।
हिमावृतैश्शृङ्गिभिरुत्तरस्यां
विभाति मे भारतभूर्विशाला ॥

३. विभिन्नवेशैर्बहुवेशभूषै-
रनेकभाषाभिरनन्तभावै-।
र्वेदान्तसिद्धान्तविशुद्धमेतत्
सनातनं भारतराष्ट्रमेतत् ॥

४. शास्त्रैरनेकैरतिसुप्रसिद्धै-
र्वेदैर्विशुद्धैरतिपूज्यमेतत्।
रामायणाद्यैरपि दिव्यकाव्यै-
र्विभाति मे भारतराष्ट्रमेतत् ॥

५. इदं हि राष्ट्रं धनधान्यवृध्या
सुशोभितं स्वच्छनगैर्नदीभिः।
तथापि म्लेच्छाधमदूषितं मे
सुराष्ट्रमेतत्सततं समृद्धम् ॥

६. राष्ट्रं समाक्रान्तमिदं विशालं
परान्नभुग्भिः पतितैर्दरिद्रैः।
अजेयमप्युन्नतमव्यजस्रम्
अनैक्यतादोषवशात्प्रजानाम्॥

७. विशालमौन्नत्यमपि स्वराष्ट्रं
समुज्ज्वलं श्रेष्ठतमं धरित्र्याम्।
परस्परेर्ष्यावशवर्तिभिरनृपैः
कथं गतं दुर्बलतां सुराष्ट्रम्।।

८. समृद्धवृक्षैः फलपुष्पपूर्णै-
र्वनैर्धरा नन्दनवत्सुरम्या।
सदैव सस्याञ्चितभूमिभागै-
र्विराजते भारतराष्ट्रमेतत्।।

९. राणाप्रतापादि-स्वराष्ट्रभक्तैः
पुराऽपि ख्यातैर्वरविक्रमाद्यैः।
नृपैरियं भूरतिसुप्रसिद्धा
समस्तभूमण्डलरत्नभूता॥

१०. तथापि कैश्चित्कलुषीकृतं त-
न्नराधमैस्तस्करतुल्यभूपै-।
र्णिरन्तरान्तःकलहैर्नृपाणा-
मवाप दौर्बल्यमिदं सुराष्ट्रम्।।

११. म्लेच्छैर्यदा भारतभूःप्रविष्टा
हता इमे दुर्बलिनस्समेऽपि।
स्वार्थान्धभूता परवीरभीताः
स्वदुर्गुणैरेव पराजितास्ते।।

१२. प्रध्वंसमानेषु शिवालयेषु
प्रविश्यमानेषु सुरालयेषु।
म्लेच्छैर्मदान्धैरतिनीचवृत्तैः
प्रसेहिरे भरतमातृपुत्राः।।

१३. साधून्विमोक्तुं वनिताश्च त्रातुं
दुष्टानिमान्दण्डयितुं तदानीम्।
पुरातने पावनराष्ट्ररत्ने
बभूवुरन्ये पुरुषोत्तमा भुवि ।।

१४. यमालयं प्रापयितुं विमूढान्
सुरालयान्त्रातुमिह प्रवृद्धाः।

शिवाजिराजेव शिवावतारा:
बभूवुरन्येऽपि सुशासका इह।।

१५. विमोक्तुकामैर्भुवमांग्लदास्यात्
प्राणा हुतास्तैर्वरवीरपुत्रै-।
स्तेषां किलासन्सफलोद्यमा वरा-
स्तेनैव स्वातन्त्र्ययुतोऽद्य लोक:।।

१६. काशीमयोध्यामपि प्राप्य म्लेच्छै:
कृताऽपवित्रा खलु पूर्वमैतै:।
शिवस्य रामस्य च पूर्विशाला
तथापि मौनं समुपाश्रिता वयम् ।।

१७. महानुभावेन जितारिणा विना
महात्मना मोहनचन्द्रनाम्ना।
सावर्करेणापि विनान्यवीरै:
स्वातन्त्र्यमेतत्कथमागतं स्यात् ।।

१८. स्वातन्त्र्यवीरैरिह राष्ट्रभक्तै:
कृता: प्रयत्नास्सफला बभूवु:।
तैर्वीरपुत्रै: प्रशशाम वीरै-
स्स्वातन्त्र्यदेव्या: प्रबला क्षुधा सा।।

१९. परन्त्विदानीं वयमेत्य सौख्यं
क्षिप्ता कथं जाति विवादगर्ते ?
धीरैस्समानीतमपि स्वराज्यं
नीचोच्छेभावैर्विफलीकृतं कै:?।।

२०. विलुप्यमानं मम राष्ट्रसौख्यं
प्रवर्धनार्थं पुनरेव नित्यम्।
शिवाजिवत् विक्रमवज्जगत्यां
कदा समायास्यति राष्ट्रभक्त:?।।

**-संस्कृतप्राच्यविद्याध्ययनसंस्थानम्,**
**जवाहरलालनेहरूविश्वविद्यालय:,**
**नवदेहली-११००६७**

# बालगझलगीतिः ( अदादिगणशिक्षणम् )

-डॉ. हर्षदेव माधवः

क्षुधातुरः यः सततम् अत्ति ।
अयं यात्रिकः शीघ्रम् एति ।
चौरः लुण्टति झटिति द्राति ।
शैवमन्दिरे भक्तः राति ।
ग्रामरक्षकः ग्रामं पाति ।
क्षेत्रे प्रातः श्रमिकः दाति ।
धेनुः क्षेत्रं प्रातः याति ।
सृष्टौ सूर्यः गगने भाति ।
अयं बिडालः दुग्धं लेढि ।
वसन्तवायुः मधुरं वाति ।
सायंकाले श्यामुः ग्वालः ।
गावं कोष्ठं गत्वा दोग्धि ।
नद्यां विप्रः प्रातः स्नाति ।
बालः मात्रा गेहम् एति ।
रामकथां मधुरां मन्दिरे ।
साधुः शनिवारे आख्याति ।
सायंकाले बलीर्वदौ च ।
हलात् कर्षकः शिघ्रं यौति ।
अदादिधातून् इत्थं शिष्यः ।
मधुरभोजनं ज्ञात्वा अत्ति ।।



**शब्दार्थ**

द्राति - भाग जाना
राति - दान करना
दाति - काटना
वाति - महकना
यौति - अलग करना

## कुत्र ( सप्तमी विभक्तिशिक्षणम् )

गगने वर्तते सूर्यः, नीडेषु सन्ति शावकाः ।
प्रवहन्ति जले नौकाः, वृक्षे सन्ति विहङ्गमाः ।।
रथ्यासु शुनकाः सन्ति, शाखासु वानराः ननु ।
लतासु सन्ति पुष्पाणि, फलानि सन्ति पादपे ।।
शालासु बालकाः सन्ति, बिलेषु च पिपीलिकाः ।
अस्ति मे लेखनी हस्ते, तव हस्ते च पुस्तकम् ।
क्रीडनकं शिशोः हस्ते, मार्गेषु सन्ति यात्रिकाः ।।
क्रेतारः विपणौ सन्ति, हट्टेषु वणिजः स्थिताः ।।
नृत्यति नर्तकी मञ्चे, उद्याने सन्ति बालकाः ।।



## कस्मात् किम् ( बालगीतिः )

दुग्धात् दधि तथा तक्रं घृतं भवति सर्वदा ।
गोधूमेभ्यः कृतं चूर्णं, चूर्णात् भवन्ति रोटिकाः ।।
वृक्षेभ्यः चलताभ्यः च, फलानि कुसुमानि च ।
जायन्ते पर्वतेभ्यः नु सरितः निर्झराः तथा ।।
बीजेभ्यः तरवः जाताः फलेभ्यः बीजसम्पदः ।
तरुभ्यः च पुनः शाखाः, शाखाभ्यः पर्णवृन्दकम् ।।
मृत्तिकायाः घटः जातः, स्वर्णात् भवति मण्डनम् ।
स्फुलिङ्गाः पावकात् सन्ति, कर्गजेभ्यः च पुस्तकम् ।।
अन्नं तु जायते शस्यात्, सरसः पङ्कजानि च ।
विचाराः मनसः जाताः, मुखाद् वाणी प्रजायते ।।
यूयं हि चतुराः बालाः, अत एव वदामि भोः ।
ईश्वरात् जायते विश्वम् ईश्वरे च विलीयते ।।



-८, राजतिलक बंगलो,
ममता औषधालयस्य सम्मुखे
आबादनगरम् बसस्थानकस्य पार्श्वे
बोपल, अहमदाबादम्-३८००५८

# प्रिये! जन्मवारे शुभाशंसनानि

-डॉ. युवराजभट्टराई

इदं जीवनं मे तदैवास्ति धन्यम्,
यदा जीवने त्वं विधत्से प्रियत्वम्।
ददानीह किं वा समोदं भणामि,
प्रिये! जन्मवारे शुभाशंसनानि ।।१।।

कदाचिन्न ते कष्टधाराः पतेयुः,
सदा सौख्ययुक्ता भवेस्त्वं च भूयः।
कथं वच्मि किञ्चात्र किं वा लिखानि?
प्रिये! जन्मवारे शुभाशंसनानि ।।२।।



भवेत् पुष्पशोभा त्वदीये पथे सा,
मुखे दिव्यहासो लसेत् सर्वदैव।
समस्तान्यभीष्टानि स्युः पूरितानि,
प्रिये! जन्मवारे शुभाशंसनानि ।।३।।

प्रभावेण पूर्णं भवेज्जीवनं ते,
सदा गौरवं वर्धमानं भवेत्ते।
प्रकर्षं प्रकुर्याः प्रकाशं प्रवच्मि,
प्रिये! जन्मवारे शुभाशंसनानि ।।४।।

सदाग्रेसरा ज्ञानपूर्णा मनोज्ञा,
सुधांशोः कलायाः कणेनासि तुल्या।
कृतं जीवनं मे महार्हं शपामि,
प्रिये! जन्मवारे शुभाशंसनानि ।।५।।

रुजापीडितं नो भवेत्ते वपश्च,
सदाऽमन्दमोदश्च भाग्येऽङ्कितः स्यात्।
पुरस्ते शिरांसि परेषां नतानि
भवेयुः प्रिये! ते शुभाशंसनानि ।।६।।

भविष्यं प्रकामं हि गर्वास्पदं स्यात्,
प्रसूनैः सुसज्ज्जं सदाभीष्टदं स्यात्।
सुहर्म्ये भवेत्ते निवासो वदामि,
प्रिये! जन्मवारे शुभाशंसनानि ।।७।।

विना कण्टकं त्वं स्वलक्ष्यं लभेथाः,
विना चिन्तया निर्भयं वा स्वशक्त्या।
सदा जीवने स्युः शुभे! भद्रकाणि,
प्रिये! जन्मवारे शुभाशंसनानि ।।८।।



-२९ अपर ग्राउण्ड फलोर
गली न.-५, प्रेम विहारः,
नगली डेयरी, नजफगढ़म्
नवदेहली-११००४३

# ध्वजो मम प्रियः

-डॉ. प्रीति आर. पुजारा

ध्वजो मम प्रियो  ध्वजो मम प्रियः
भारतीयो ध्वजः सखे! मम प्रियः ।। १।।

त्रिरंगः कथ्यते ध्वजोऽयं मुदा
एकतासंस्थापने रतोऽयं सदा ।।२।।



शुभ्रवर्णोऽयं सत्वबोधकः
गैरिको ध्वजे पुनस्तु शौर्यबोधकः ।।३।।

शस्यश्यामलाधराप्रदर्शकः
ध्वजे सुशोभते  हरितवर्णपट्टकः  ।।४।।

अशोकचक्रं मध्ये स्थापितम्
सौहार्दशान्तिसन्देशं सदा प्रसारितम्  ।।५।।

प्राणैरपि भुवि ध्वजं नु रक्षतात्
आबालवृद्धमानवैः  सम्माननीयः स्यात्  ।।६।।

# मेघो वर्षतु

-डॉ. प्रीति आर. पुजारा

मेघो वर्षतु, मेघो वर्षतु धारासारैर्मेघो वर्षतु ।
सौदामिन्या साकं वर्षतु मेघो वर्षतु मेघो वर्षतु ।।

शस्यश्यामलां धरणीं कर्तुं मेघो वर्षतु मेघो वर्षतु ।
नवपल्लवितं जीवितं कर्तुं मेघो वर्षतु मेघो वर्षतु ।।

तृषिता वसुधा शून्यप्राणा मूका पिका दीना सञ्जाताः ।
प्रणयमधुभिः सिञ्चतु हृदयं मेघो वर्षतु मेघो वर्षतु ।।

पश्य पश्य हे! कृषकबान्धवान् मेघातुरान् वातुलान् भो! ।
प्रतीक्षां तेषां परिहर्तुं मेघो वर्षतु मेघो वर्षतु ।।

आसप्ताहं मेघो वर्षतु रात्रिन्दिवसं मेघो वर्षतु
शालायामवकाशं प्राप्तुं मेघो वर्षतु मेघो वर्षतु ।।



-संस्कृतविभागः,
डी.सी.एम.कला एवं वाणिज्य
महाविद्यालयः, विरमागम,
अहमदाबादम्, गुजरातप्रदेशः

# एका विमानदुर्घटना

-सुमन ललितः

एका विमानदुर्घटना, तेषां उड्डयनमात्रेण कति प्राणाः सदा विलुप्ताः अभवन्।
कति स्वप्नाः, कति कथाः, कति अनियोजितयात्राः च क्षणमात्रेण सहसा समाप्ताः।
आकाशस्य ऊर्ध्वतां स्पृशितुं प्रवृत्ताः स्वप्नाः नेत्रनिमिषे भस्मरूपेण परिणताः।
जीवने कदा कुत्र किं भविष्यति इति किमपि वक्तुं न शक्यते।
जीवनस्य कथा यदा कथा वा वार्ता वा भविष्यति तदा किमपि वक्तुं न शक्यते।
नेत्राणि आर्द्रं भवन्ति, हृदयं दुःखी भवति
अतीव दुःखदं भवति, मनः दुःखी भवति इति चिन्तयन् यत् कोऽपि किमपि कर्तुं न शक्नोति।



अहं प्रायः दुःखस्य भावः न्यूनीकर्तुं वार्ताम् न शृणोमि,
अहं जानामि, बालवत् नेत्रे निमील्य रात्रौ इति मन्ये
बाह्यवास्तविकतायाः कटुज्योतिः तत्रैव तिष्ठति
किमर्थं? सर्वे समाचाराः कृष्णवर्णानां दुःखस्य निराशायाः च
अद्यकाले वार्ता श्रुत्वा एव मम किमर्थं दुःखं भवति।
अद्य प्रतिक्षणं अस्माकं परितः नूतना वार्ता भवति, अस्माकं दृष्टिः तस्मिन् पतति,
अस्माकं जिह्वा किं वदन्ति, वार्तापूर्णे लोके कुत्र गतः?
आशापूर्णाः जीवनस्य उज्ज्वलाः वर्णाः
प्रेमः, विश्वासः, मानवता च पूर्णा वार्ता?
यथार्थजीवनं तत्सम्बद्धं सर्वं सुखं च इदानीं वञ्चना इव दृश्यते।
किमर्थं सहसा केचन जनाः जीवनस्य सत्यं, तस्य वास्तविकं अर्थं अन्वेष्टुं प्रस्थिताः इति अवगम्यते।

-गृह संख्या-१४, ब्लाक एच
वीथि सं.-१९, ४० फुटा मार्गस्थ समीपे
देहली-११००५१

# बाबा वैद्यनाथः च श्रावणमासस्य माहात्म्यम्

-डॉ. धनञ्जयकुमारमिश्रः

हर हर महादेव!

एषः घोषः स्वयमेव भक्तेः स्रोतः प्रवर्तयति। श्रावणमासे तु एषा श्रद्धा भावनया सह परिपुष्णा भवति। भारतीयसंस्कृतेः अस्मिन् पवित्रे मासे शिवभक्तिः, तपः, संयमः च एकत्र सम्प्रतिष्ठितं दृश्यते। एषः मासः विशेषतः पूर्यते देवघरनगर्यां प्रतिष्ठितस्य बाबा वैद्यनाथस्य दर्शनेन, यत्र सहस्रशः भक्ताः कावडयात्रां कुर्वन्ति। बाबा वैद्यनाथः-करुणाकरः कृपानिधिः च।

झारखण्डराज्ये स्थितः देवघरः नाम नगरी प्रसिद्धा या, यत्र वैद्यनाथज्योतिर्लिङ्गं स्थितम् अस्ति। एषः ज्योतिर्लिङ्गः द्वादशेषु प्रमुखं गण्यते। पौराणिककथाः वदन्ति यत् रावणः महातपसा शिवं प्रसादयामास, तम् लङ्कां नेतुम् प्रयत्नं चकार। किन्तु देवगणानां युक्त्या सः शिवलिङ्गं देवघरे एव स्थापयामास। अतः प्रभृति एषः क्षेत्रः कामना-सिद्धिपीठं रूपेण प्रसिद्धम्।

वैद्यनाथः इति नाम्ना शिवः अत्र पूज्यते, यतः सः वैद्यरूपेण पीडितं लोकं उपचारं करोति स्म। सतीदाहानन्तरं तपस्विरूपेण वने स्थितं शिवं देवाः वैद्यरूपेण पूजयामासुः, तदा अयं लिङ्गः अत्र प्रतिष्ठितः इति विश्वासः अस्ति।

श्रावणमासः शिवपूजनस्य विशेषकालः। प्रत्येकसोमवारे श्रावणसोमवती इत्युच्यते, यः व्रतैः, उपवासैः, जलाभिषेकैः च पूर्णः भवति। भारतसर्वतः आगता भक्ताः सुलतानगञ्जात् गङ्गाजलं संग्रह्य १०५ कि.मी दूरीं पदयात्रया गत्वा देवघरे बाबा वैद्यनाथं जलाभिषेचयन्ति।

एषा यात्रा न केवलं शारीरिका यात्रा अस्ति, अपि तु आत्मशुद्धेः, श्रद्धायाः, प्रेम्णः च पथः। कन्धरे गङ्गाजलं, जिह्वायां "बोल बम" इत्यादिभिः घोषैः सह एषा यात्रा भक्तेः पराकाष्ठां दर्शयति।

देवघरं केवलं तीर्थं न, अपि तु शिवमयी चेतना अस्ति। अत्र वायौ भक्तिरसः, भूमौ विश्वासः, जनानां लोचनेषु आशा च दृश्यते। श्रावणमासे एषा नगरी दीपैः, स्तोत्रैः, भक्तैः च आलोकिता भवति।

स्थानिकपरम्परायामपि बाबा वैद्यनाथस्य विशेषं स्थानं अस्ति। नागपञ्चमी, रक्षा-बन्धनं, शिवविवाहोत्सवः च-सर्वत्र शिवभावनया देशोऽयं पूरितः भवति।

बाबा वैद्यनाथः केवलं देवता न, अपि तु जीवनचेतना। श्रावणमासः अस्मान् स्मारयति यत्-ईश्वरस्य समीपं गन्तुं न केवलं क्रिया, अपि तु निष्ठा, श्रद्धा च आवश्यके।

अतः एषः मासः आह्वानं करोति -

**"आगच्छतु, श्रावणे शिवस्य चरणयोः शरणं व्रजाम। यत्र शिवः स्वयं भक्तस्य प्रतीक्षां करोति।"**

**- संस्कृतविभागाध्यक्षः,**
**सिदो-कान्हू मुर्मू विश्वविद्यालयः, दुमका,**
**झारखण्डम्**

# संस्कृतसाहित्ये पर्यावरणरक्षोपायाः

-डॉ. आभा झा

संस्कृतम् अस्माकं भारतीयानां ज्ञानवाहिनी, विविधोपयोगिज्ञानवाहिनी, विश्वमानसाकर्षिणी च भाषा अस्ति। परं काऽपि भाषा अतीतगौरवगानेन न, अपितु तदीय वाङ्मये स्थितस्य विचारस्य समाजविशेषे ग्राह्यताबोधेन एव शिक्षणीया पठनीया वा भवति। अद्यत्वे इयं भाषा यद्यपि सामान्यजनानां विचारविनिमय- साधनीभूता नास्ति, तथापि स्वगुणवैभवमहिम्ना अद्यापि भारतस्य सर्वेष्वेव भागेषु, विश्वस्य अन्येष्वपि च देशेषु बहुत्र विविधं पठ्यते पाठ्यते च। परं सामाजिक जीवनविकासेन समं शिक्षणव्यवस्थायाः स्वरूपः परिवर्तितः जातः। वर्तमानकालखण्डे संस्कृतस्य किं महत्त्वमासीत् इत्यस्मिन् विषये कस्यापि रुचिः नास्ति। सर्वे जानन्ति एव यत् भाषेयं भारतस्य चेतनागतेः तत्प्रगतेः प्रकृतेश्च स्वरूपसन्दर्शिनी तत्संस्कारालोकवाहिनी भाषा अस्ति। अस्माकं सर्वं जीवनादर्शं संस्कृतकृतप्रसरं विद्यते। परम् वर्तमानकाले भाषायाः अस्याः पठनस्य कः लाभः अस्ति? अस्मिन् वैश्विके युगे आंग्लभाषां परित्यज्य अत्यल्पजनबोध्यया भाषया सम्भाषणस्य किं नाम प्रयोजनम्? एकविंशत्याः शताब्द्याः तृतीये दशके वयं यत्किमपि कुर्मः, यत्किञ्चित् व्यवहरामः, यस्मिन्-कस्मिन् अपि कर्मणि स्वसमयं यापयामः, सर्वप्रथमं तस्य उपयोगिताविषये चिन्तयामः। पूर्वम् अपि जनाः वदन्तः एव आसन् -'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते'।

तर्हि अधुना अस्माकं विवेच्यः विषयः अस्ति- वयं संस्कृतभाषां पठित्वा कथम् आत्मनः विश्वस्य अन्यस्मिन् भागे निवसतां जनानां च जीवनं प्रदूषणमुक्तं कर्त्तुम् शक्नुमः, आदर्शां जीवनचर्यां परिपालयितुं शक्नुमः, प्रदूषणकारणानां मूलोच्छेदनं कृत्वा समस्यायाः अस्याः निराकरणं कर्त्तुम् शक्नुमः, आधिव्याधिभिः मुक्तां जीवनविधिं स्वीकर्तुं शक्नुमः?

साम्प्रतं पर्यावरणप्रदूषणं भयावहं रूपं गृह्णन् संपूर्णं मानवसमाजं भयाक्रान्तं करोति। अनेन वैश्विक-उष्णता भयङ्करतां प्राप्ता अस्ति, जलवायु-परिवर्तनं जातमस्ति। वैज्ञानिकप्रगतेः उद्दामाकांक्षया वयं जगतः प्रकृतस्थितौ हस्तक्षेपं कृत्वा प्रकृत्याम् असंतुलनम् कृतवन्तः स्मः। भौतिकप्रगतिपथे अन्धधावनं कुर्वद्भिः अस्माभिः यन्त्रशाला निर्मिता, तदर्थं वन-पर्वतादीनां कर्तनं कृतम्। एतादृशं कार्यं कुर्वन्तः गौरवबोधेन दीप्ताः जाताः। परम् अस्मिन् क्रमे प्रकृत्यां सर्वत्र विकृतिः आनीता। स्थितिरियं भयाक्रान्तां करोति। केन उपायेन अस्यां स्थितौ परिमार्जनं भवेदिति गंभीरतया चिन्तनस्य आवश्यकतां सर्वे अनुभवन्ति। संपूर्णं विश्वम् अस्याः समस्यायाः समाधानस्य अन्वेषणाय प्रयत्नशीलमपि अस्ति। वयमपि एतदर्थं प्रयत्नशीलाः स्मः। किम् अस्मिन् प्रयासे वयं प्राक्तनसाहित्येभ्यः अपि सहायतां प्राप्तुं शक्नुमः? अस्मिन्नेव प्रसंगे वयमद्य संस्कृत-साहित्ये पर्यावरण रक्षायाः कृते प्रत्यक्षतः परोक्षतः वा किमुक्तमस्ति, इत्यस्मिन् विषये संक्षेपेण चर्चां करिष्यामः।

भवन्तः सर्वे जानन्ति यत् सीमानम् अतिक्रान्ता प्रदूषणसमस्या अस्माकम् अविवेकस्यैव परिणामः अस्ति। भौतिकीं समृद्धिं सौविध्यं च अवाप्तुम् अस्माभिः प्रकृत्याः आन्तरिके क्षेत्रे अनावश्यकः हस्तक्षेपः कृतः, वनानि कर्तितानि, जलस्य प्रवाहः रोधितः, पर्वतानां कर्तनं कृतं, पृथिव्याः अनावश्यकं खननं कृतं, यन्त्रशालायाः अवशिष्टं

पदार्थं नद्यां प्रवाहितम्, अधुनाऽपि प्रवाह्यते, यन्त्रगारादिभ्यः निर्गतेन च विषाक्तेन धूमेन वायुश्च दूषितः। परमनेन अत्याचारेण माता पृथ्वी विषण्णा अस्ति, पिता आकाशः च कुपितः। समग्रं सौर-मण्डलं रुष्टं जातमस्ति। भूमण्डलस्य तापः वर्धितः।

भारतीयायां मनीषायां पञ्चतत्त्वेभ्यः सृष्टेः निर्माणं, तेषां च संतुलनेन मनुष्याणां कल्याणमस्ति इति स्वीकृतमस्ति। भारते ऋग्वैदिककालादेव प्रकृतिः देववत् संपूज्या संरक्ष्या च मान्यते। 'माता भूमिः पुत्रोऽहं पृथिव्याः' इति आर्षवाक्यं पृथिव्याः मातृत्वं घोषयन् तस्याः सम्मानं सुरक्षां च निर्देशयति।

यजुर्वेदस्य एकस्मिन् लोकप्रिये मंत्रे समग्रस्य पर्यावरणस्य शान्तिमयतायाः स्तुतिः वर्तते। अत्र द्युलोकस्य, अंतरिक्षस्य पृथिव्याश्च शान्तेः भावप्रवणा प्रार्थना अस्ति-

'ॐ द्यौ शान्तिरन्तरिक्षः शान्तिः पृथ्वी शान्तिराप: शान्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वे देवाः
**शान्तिर्ब्रह्म शान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॐ शान्तिः शान्तिः शान्तिः ॐ।।'**

(यजुर्वेद- ३६.१७)

एकस्मिन् स्थाने खननार्थं पृथिव्याः क्षमायाचना क्रियते-

**यत्ते भूमे विखनामि क्षिप्रं तदपि रोहतु**
**मां ते मर्म विमृग्वरी मा ते हृदयमर्पितम्।**

वयं औषध्यर्थं, बीजवपनार्थं, शस्यस्य, खनिजपदार्थस्य च बहिरानयनार्थं च खननं कुर्याम चेत्, भवत्याः परिवारः, वनस्पत्यादयः पुनः तीव्रगत्या वर्धन्तु, भवत्याः मर्मस्थलम् आहतं मा भवेत्। भूमिपर्वतानां खननं कृत्वा पर्यावरणस्य वक्षस्थले प्रहारं कुर्वतां समेषामेव कृते ध्यातव्यमिदं मन्त्रं यत् अपरिहार्यायां आवश्यकतायां जाते सति एव ईदृशं कार्यम्, अन्यथा प्रकृत्याः अनुशासनं पालनीयम्। अमरीकायाः विद्वान् ब्लूमफील्ड महोदयः त्रिषष्टिमितैः मन्त्रैः गुम्फितं पृथ्वीसूक्तं विश्वस्य श्रेष्ठतमां कवितां इति कथितवान्।

अथर्ववेदे एव उक्तमस्ति यत् पृथिव्याः पर्वताः, समतलभागाः , निम्नभागाश्च यदा वनस्पतिभिः रहिताः भवन्ति, तदा प्रकृतिः मानवानां रक्षां कर्तुम् अक्षमा भवति-

**आसबाध बाध्यतो मानवानां उद्वत प्रवतः सम बहु**
**नानावीर्या ओषधीर्या विभर्ति पृथ्वी न प्रथता राहता न।।**

पृथिव्याः परं पर्यावरणस्य मुख्यं तत्त्वं भवति जलम्। ऋग्वेदे जलस्य महत्त्वं विश्वस्य जन्मदायि-मातृवत् अस्तीति निगदितम्-

**'मातृतमा विश्वस्य स्थातुर्जगतो जनित्रीः।'** (६.५०.७)

ऋग्वेदे जलस्रोतसः स्तुतिः बहुत्र कृतास्ति, अस्माकं रक्षायाश्चापि प्रार्थना तत्र अस्ति-

**"आपो देवीरिह मामवन्तु "**

शतपथ ब्राह्मणे जलं प्राणतत्त्वमिति घोषितम्-"

**''आपो वै प्राणः''**

पर्यावरणस्य एकं मुख्यं घटकं वायुरपि विद्यते। वायुः प्रत्यक्षं देवः प्रत्यक्षं च ब्रह्म अस्ति। ऋग्वेदे (१.९०.९) स्तुतिः प्राप्यते–

**'नमस्ते वायो, त्वमेव प्रत्यक्षं ब्रह्मासि, त्वामेव प्रत्यक्षं ब्रह्मवदिष्यामि। तन्मामवतु'**

वृक्षाणाम् आरोपणेन, संरक्षणेन च वायुमण्डलस्य असन्तुलनं दूरीकर्तुं शक्यते इति तथ्यं प्राचीनकालादेव स्वीकृता अस्ति। ऋग्वेदस्य अरण्यानी-सूक्तं चापि वनरक्षणाय प्रेरयति। यजुर्वेदे ''वृक्षाणां पतये नमः'' इति उक्त्वा वृक्षादयः सत्कृताः,संरक्षणीयाश्च घोषिताः। अग्निपुराणानुसारं ''यः कोऽपि स्ववंशस्य, धनस्य, सुखस्य च कामनां करोति सः फलपुष्पान्वितान् वृक्षान् मा कर्ततु।''

मत्स्यपुराणानुसारम् ''एकस्य वृक्षस्य आरोपणं दशपुत्रेण समं सुखं ददाति''। वराहपुराणे कथितमस्ति– '' पञ्चाम्रवापी नरकं न याति'' अर्थात् यः पञ्च आम्रवृक्षान् रोपयति सः मृत्योः अनन्तरम् अपि नन्दति। पद्मपुराणे निगदितमस्ति ''यः मनुष्यः मार्गम् उभयतः वृक्षारोपणं करोति सः स्वर्गलोके सुखम् अवाप्नोति।'' ब्रह्मोपनिषदि उक्तमस्ति यत् जनाः प्रकृतिं रक्षन्तु, सा जनान् रक्षयिष्यति–''रक्षया प्रकृतिः पातु लोकाः''।

एतेषां कथनानां निहितं तात्पर्यमस्ति यत् संस्कृतसाहित्ये प्रकृतिसंरक्षणस्य महत्त्वं वैदिकालादेव स्वीकृतमस्ति। तत्र क्षितिः, जलं, पावकः, वायुः, सूर्यः आकाशश्च प्रत्यक्षदेवरूपेण आद्रियन्ते, पूज्यन्ते च। पूजनस्य तात्पर्यं भवति संरक्षणेन समाराधनम्।

साम्प्रतं विश्वमानवतायाः समक्षं जीवन-मरणस्य प्रश्नः अस्ति। भारतीय संस्कृतौ पर्यावरण-संरक्षणस्य सूत्राणि निहितानि सन्ति। आवश्यकता अस्ति-सर्वेषां कार्यरूपानयनस्य। वैदिक परम्परायाः संस्कृतेश्च विज्ञानं गृहीत्वा अस्माभिः प्रदूषणनिवारणाय प्रयत्नः करणीयः।

उपरि ये अंशाः उद्धृताः, ते पर्यावरणरक्षायाः प्रत्यक्षोपायं नैव कथयन्ति, परं यदि वयं ध्यानेन पश्यामः चेत् तत्र प्रकृतिसंरक्षणस्य बाह्यकलेवरं न, अपितु आत्मा दृश्यते। यदा वयं भूमिं 'मातरम्' इति कथयामः, तर्हि कथं तस्याः अहितं कर्तुं शक्नुमः? वायुं 'देवम्' इति मन्यामहे चेत् कथं तस्य वक्षे आक्रमणं कर्त्तुं शक्नुमः? जलं जगतः 'प्राणतत्त्वम्' इति अवबोधयामः चेत् कथं तस्मिन् विषं सम्मिश्रयामः? भारतीयसंस्कृतौ नदी मातृरूपेण पूजिता अस्ति, पर्वतश्च देवतात्मा इति निगदितः (अस्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः- महाकविः कालिदासः)। अयमेव भावः प्रसारणीयः, प्रकृत्याः मातृरूपता पुनः स्थापनीया, विकासमदे निमज्जितानां जनानां चक्षुः उद्घाटनीयम्, सुखस्य व्यापकः अर्थः बोद्धव्यः। एवम् पर्यावरणरक्षार्थं संस्कृताध्ययनस्य, प्राप्तस्य च ज्ञानस्य व्यवहारिकरूपेण प्रयोगस्य महत्त्वं भवितुमर्हति। आगच्छत,' धर्मो रक्षति रक्षितः' इति वाक्यांशेन समं वयं कथयामः-

**'प्रकृतिः रक्षति रक्षिता।'**

# कर्मणा लभ्यते फलम्

-डॉ. आभा झा

(संवादः)

**समयः-रात्रि-कालः  स्थानम्-मंदिरस्य परिसरः**



एका शिला देवालये स्थितां मूर्तिं प्रति स्व-उपालम्भं प्रकटयति-

**शिला-** देवि! भवती देवी अस्ति। सर्वेषां कृते समभावं रक्षसि। परं पश्य! भवत्याः अस्मिन् संसारे मया सह अन्यायं भवति।

**मूर्तिः-** कीदृशः अन्यायः?

**शिला-** सर्वे जनाः भवतीं पूजयन्ति, पुष्पैः अर्चयन्ति, परं ममोपरि नारिकेलं भञ्जयन्ति। एतेन अहं पीडाम् अनुभवामि।

**मूर्तिः-** एतस्मिन् विषये अहं किं कर्त्तुं शक्नोमि?

**शिला-** भवती अपि प्रस्तर-निर्मिता, अहमपि। भवत्यै एतादृशी विषमता रोचते खलु?

(तदैव एतयोः वार्तां शृण्वन् एकः मूर्तिकारः प्रविशति।)

**मूर्तिकारः-** शिले! देवीं प्रति किमर्थम् उपालम्भं ददासि? त्वं तु स्वयमेव ईदृशीं दशां प्राप्ता असि?

**शिला-** अहम्? कथम्?

**मूर्तिकारः-** शिले! स्मर, अहमेव तव कान्तिं दृष्ट्वा त्वां मूर्ति-निर्माणाय अचिन्वम्। प्रथमे प्रहारे एव त्वम् उच्चैः रोदितुम् आरब्धवती। अहं वारम्वारम् अबोधयम् यत् प्रारम्भे काचित् वेदना भविष्यति, परं पश्चात् तव रूपं दिव्यं भविष्यति। जनाः तव सम्मानम् अपि करिष्यन्ति। परं त्वं न अमानयः। अधुना स्व कर्मणः फलं भुङ्क्ष्व।

**शिला-** अहम् स्मृतवती। परम् तदा अहं शिशुः आसम्, छेदनस्य कष्टं सोढुम् असमर्था आसम्। दुःखम् असहमाना अहम् एतावान् तिरस्कारं प्राप्स्यामि इति न अचिन्तयम्।(रोदिति...............)

**मूर्तिकारः-** यदि कोऽपि आदौ एतादृशं स्खलनं न कुर्यात् तर्हि पश्चात्तापम् अपि न कुर्यात्। जानासि त्वम्, इयं शिला त्वादृशी कान्तियुता नासीत्, परम् कष्टसहने समर्था आसीत्। अधुना पश्य अस्याः रूपं, सम्मानं, सौभाग्यं च। इयम् मूर्तिः स्वतपसः एव फलं प्राप्तवती, सहिष्णुतायाः पारितोषिकं लब्धवती।

**शिला-** सत्यं कथयति भवान्, अहं स्व-अधीरतायाः एव फलं प्राप्तवती। एषा मूर्तिः वस्तुतः कर्मणा एव साफल्यं प्राप्तवती। सत्यमेवोक्तम्-

**यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणं छेदनतापताडनैः।**
**तथा चतुर्भिः पुरुषं परीक्ष्यते त्यागेन शीलेन गुणेन कर्मणा॥**

# कर्मवीरो विजयते

–डॉ. आभा झा

कैलाशः नवमकक्षायां पठति। सः अतीव कुशाग्रबुद्धिः बालकः अस्ति। तस्य अध्ययने रुचिः अपि अस्ति। कक्षायां प्रथमस्थानं प्राप्नोति सः। सर्वे शिक्षकाः तस्मिन् स्निह्यन्ति।

तस्य पिता श्रमिकः अस्ति। काठिन्येन एव सः परिवारस्य भरण-पोषणं करोति, परं कैलाशस्य रुचिं दृष्ट्वा येन-केन प्रकारेण तं विद्यालयं प्रेषयति।

एकदा एकस्मिन् निर्माणाधीनात् भवनात् पतित्वा तस्य पिता गंभीररूपेण आहतः अभवत्। अधुना किं भविष्यति? चिकित्सालयस्य व्ययं तु भवननिर्माता ददाति, परं केन उपायेन भोजनोपायः भविष्यति? कथं वा कैलाशस्य शिक्षा प्रचलिष्यति? सर्वत्र अन्धकारः प्रसृतः। प्रकाशस्य रेखा अपि न दृश्यते। एवमेव दशदिनं व्यतीतम्। दशदिनेभ्यः विद्यालयात् अनुपस्थितस्य कैलाशस्य विषये कक्षाध्यापकः चिन्तितः जातः। कक्षापञ्जिकातः गृहसंकेतं प्राप्य सः सन्ध्याकाले तस्य गृहम् अगच्छत्। सर्वं वृत्तान्तं ज्ञात्वा, तम् आश्वासयन् गृहं प्रत्यागतः। अग्रिमे दिने (अन्येद्युः) सः प्रधानाचार्यं प्रति स्वचिन्तां निवेदितवान्। प्रधाचार्यस्य निर्देशानुसारं तम् विद्यालयम् आह्वयत्।

'कैलाश! त्वम् प्रतिदिनम् विद्यालयम् आगच्छ, वयं सर्वे मिलित्वा तव सहायतां करिष्यामः। तव कृते छात्रवृत्तेः अपि व्यवस्थां करिष्यामः।'

'न, महोदय! अहं दयाम्, अनुदानं वा प्राप्य अध्ययनं न करिष्यामि। अधुना मम परिवारस्य समक्षं भोजनस्यापि संकटम् अस्ति। मया तु श्रमिकेण एव भाव्यम्।'

क्षणं विचिन्त्य प्रधानाचार्यः उक्तवान्-'एवम् अस्ति चेत् अहं तुभ्यं मालाकारस्य कार्यं ददामि। त्वम् ममावासस्य सेवकगृहे स्वपरिवारेण सह निवासं कुरु, अत्रैव च धनोपार्जनेन सह विद्यालाभम् अपि कुरु।' प्रधानाचार्यस्य वचनं श्रुत्वा कैलाशस्य नेत्राभ्याम् कृतज्ञतायाः अश्रूणि निरगच्छन्। तद्दिनात् सः प्रातः सायं उद्याने कार्यं करोति स्म, परं मनोयोगपूर्वकम् अध्ययनम् अपि करोति स्म। सः स्वभगिनीम् अपि विद्यालयं प्रेषयति स्म। षण्मासानन्तरं तस्य पिता गृहं प्रत्यागतः। अधुना सः स्वस्थः जातः, परं खञ्जेन पादेन कठिनश्रमं कर्तुम् असमर्थः आसीत्। तथापि शनैः शनैः पुत्रस्य कार्ये सहयोगम् अपि करोति स्म। एवं क्रमेण कठिन परिश्रमं कुर्वन् कैलाशः क्रमशः दशम, द्वादश, स्नातकपरीक्षां च सफलतया उत्तीर्य प्रतियोगिपरीक्षायाः सन्नद्धताम् अकरोत्। वर्षाभ्यन्तरम् एव सः मध्यप्रदेश राज्य सेवा चयन परिषदा चयनितः।

अद्य कैलाशः एकः सफलः राजपत्रितः अधिकारी अस्ति। सर्वे तं अध्यवसायिनं प्रशंसन्ति।

–संस्कृत-अध्यापिका
गार्गी सर्वोदय-कन्या-विद्यालयः,
ग्रीनपार्कः, नव देहली-१६

# विद्यायाः महत्त्वम्

**-डॉ. लता विगः**

महेशः श्यामः द्वे मित्रे आस्ताम्। महेशः धनि कस्य पुत्रः आसीत्। परं श्यामस्य पिता त्रिचक्रिकां चालयति स्म।

महेशः पठने कुशलः न आसीत्। सः स्व-समयम् इतस्ततः भ्रमणाय यापयति स्म। किन्तु श्यामः पठने बहु-कुशलः आसीत्। सः महेशम् अनेकवारं पठनाय प्रेरयति स्म। परं महेशः तस्य उपहासं कृत्वा हसति स्म। सः श्यामं कथयति स्म, त्वम् पठनं त्यज। तव पिता निर्धनः अस्ति। श्वः त्वमपि स्व-पितावत् त्रिचक्रिकां चालयिष्यति। मम पिता तु व्यवसायं करोति। अहं तु अल्पपठनेन अपि व्यवसायं कर्तुं शक्नोमि। परं श्यामः तं वारं वारं कथयति- विद्या अवश्यं प्रापणीया। परन्तु महेशः तस्य वार्तां न शृणोति स्म। शनैः शनैः समयः गच्छन् स्म। अस्मिन् वर्षे दशमी कक्षा आसीत्। श्यामः दशमी-कक्षायाः कृते बहु-परिश्रमं करोति स्म। किन्तु महेशः इतस्ततः भ्रमित्वा स्व-समयं यापयति स्म। अधुना श्यामः स्व-गृहात् बहिः न निर्गच्छति स्म। विद्यालयात् आगत्य सः पुनः पठनाय तिष्ठति स्म। अद्य परीक्षायाः प्रथमः दिवसः आसीत्। श्यामः निश्चन्तः आसीत्, परन्तु महेशः संभ्रान्तः आसीत्। सर्वाः परीक्षाः अभवन्। यदा परीक्षापरिणामः आगतः। तदा श्यामः सम्पूर्णे विद्यालये प्रथमं स्थानं प्राप्तवान्। महेशः अनुत्तीर्णः अभवत्। सः अति-अरोदत्। परन्तु अधुना किमपि भवितुं न शक्नोति स्म ।

श्यामः विद्यालयस्य छात्रवृत्ति-माध्यमेन पठति स्म। सः स्व-परिश्रमेण अग्रे निर्गच्छति स्म। तदा सः अति परिश्रमेण एकस्मिन् कम्पनी इत्यस्मिन् स्थाने सः 'सी.ई.ओ' इति पदं प्राप्तवान्। परं महेशः एकस्मिन् आपणे एकः सेवकः आसीत्। अकस्मात् तस्य पिता मृत्युं प्राप्तवान्। तस्य व्यवसायः अपि नष्टम् अभवत्। शनैः शनैः सम्पूर्णं धनमपि। विनष्टम् अभवत्।

**अतएव सत्यम् उक्तम्-विद्या विहीनः पशुः।**
**अतः अस्माभिः अपि विद्या अवश्यं प्राप्तव्या।**



**-संस्कृतशिक्षिका**
**डी .ए .वी सैन्टेनरी पब्लिक स्कूलः,**
**पश्चिम एन्क्लेव, नवदेहली-५७**

# सरलता-श्रेष्ठं भूषणम्

-डॉ. अञ्जू बाला

संसारे सरलता मानवस्य सुन्दरतमं भूषणं मन्यते। **इंग्लैण्डदेशस्य प्रधानमन्त्रिणः ग्लैडस्टोन** नामकः महापुरुषः अतीव सरलं जीवनं यापयति स्म। सः स्ववस्त्राणि स्वयमेव शुद्धयति परिमार्जयति स्म, स्वयमेव च बाजारतः शाकं फलानि च चक्रिकां वहन् आनयति स्म।

एकदा रेलयानयात्रायाः समये कश्चन पत्रिकासम्पादकः तेन सह किञ्चन स्टेशनवर्यं गन्तुं अनुमतिमयाचत। सः सहर्षं "आम्" इति उक्तवान्। सम्पादकः प्रथमवर्गस्य यानकक्षे प्रधानमन्त्रिणं अन्वेष्टुं प्रयत्नं कृतवान्। परन्तु तं तत्र न पश्यति स्म।

तस्मिन् समये कश्चन युवकः सम्पादकं पृष्टवान् - "भवान् प्रधानमन्त्रिणं अन्वेषयन्ति किम्? ते द्वितीयवर्गे उपविशन्ति।" सम्पादकः तत्र गतः तम् अन्विष्टवान् च।

प्रधानमन्त्रिणं पत्रं पठन्तं दृष्ट्वा सम्पादकः पृष्टवान्- "भवन्तः प्रधानमन्त्रिणः सत्तां प्राप्य अपि द्वितीयवर्गे यानयात्रा कुर्वन्ति, किमर्थम्?"

प्रधानमन्त्री उवाच- "सौम्य! प्रथमवर्गे उपविष्टः युवकः यः मां दर्शितवान्, सः ममैव पुत्रः अस्ति। तस्य सुखाय प्रथमवर्गे उपवेशनं रोचते, किन्तु अहं कृषकपुत्रः, मम कृते द्वितीयवर्गः पर्याप्तः। साधु-जनानाम् आचरणं सर्वेषां अनुकरणीयं भवति।"



-२०२६, वसुंधरा
गाजियाबाद, उत्तर प्रदेश

# सत्यनिष्ठा

**–ओम्प्रकाश ठाकुरः**

एकेन रामचन्द्राभिधेन कृषकेण कृषिभूमिः विक्रीता। चन्द्रदेवेन तस्मात् क्रीता। भूमिः पुष्कलम् उर्वरा आसीत्। तां प्राप्य चन्द्रदेवः प्रसन्नः जातः। यदा तेन हलेन सा भूमिः कर्षितुम् आरब्धा, हलस्य स्पर्शः केनचित् धातुपात्रेण अभवत्। उत्खननेन तत्पात्रं भूमेः निष्कासितं तेन। पात्रं स्वर्णमुद्राभिः पूरितम् आसीत्। चन्द्रदेवः तत्पात्रम् आदाय रामचन्द्रम् उपजगाम उवाच च भ्रातः। भूमिं कर्षता मया एतत् कनकमुद्राभरितं पात्रं लब्धम्। एतद् गृह्यताम्।

तन्निशम्य रामचन्द्रः अकथयत्–यत् बन्धुवर! मया तु भूमिः विक्रीता। भूम्यां यदस्ति, तत् तवैव। तत्र न मेऽधिकारः। चन्द्रदेवः अभाषत, भ्रातृवर्य! अहं तु भूमिं क्रीतवान्। तस्यां निगूढस्य धनस्य नाहं स्वामी। एवं परस्परवाद–प्रतिवादपरयोः तयोः गृहे कश्चित् सम्बन्धी प्राप्तः। स मतिमान् आसीत्। सत्यनिष्ठयोः तयोः वार्ताविषयं ज्ञात्वा स चन्द्रदेवम् अपृच्छत्–किं कश्चित् तव पुत्रः पुत्री वा विवाहयोग्या अस्ति।

सोऽवदत्, अस्ति ममैका अष्टादशवर्षा कन्या। तन्निशम्य तेन उक्तम् यद्येवं ततः किं विवादेन। रामचन्द्रस्य सुशीलेन यूना पुत्रेण साकं स्वकन्यायाः विवाहः सम्पादनीयः। एतद् धनं च ताभ्यां समर्प्यताम्। तस्य वचनं सर्वैः अभिनन्दितम्। शुभे अहनि तयोः परिणयः सम्पन्नः जातः। तत् सौवर्णं वसु च ताभ्याम् अदीयत।



# बुद्धिचातुर्यम्

**-ओम्प्रकाश ठाकुरः**

पुराकाले श्रावस्तीनगर्यां प्रसेनजिताभिधः न्यायप्रियः राजा शासनं करोति स्म। तस्य शासनव्यवस्था प्रशंसनीया आसीत्। अकुतोभया तस्य प्रजा सर्वविधं सौख्यम् अन्वभूत्।

तदानीं कश्चिद् ब्राह्मणः कुतश्चिद् प्रदेशात् आगत्य तत्र निवसितुम् आरेभे। तेन हि पौरोहित्यकर्मणा लब्धेन धनेन द्विसहस्रस्वर्णमुद्राः एकत्रीकृताः। ताः पात्रे निधाय वनप्रदेशे नागबलावृक्षस्य मूले निक्षिप्य रक्षितवान्। स प्रायः तत्र गत्वा मुद्राः विलोक्य तुष्यति स्म।

एकस्मिन् अहनि तत्र गतेन तेन भाण्डं रिक्तम् व्यलोकि। बहु दिनार्जितं महान्तं धनराशिं विनष्टं विज्ञाय स शोकार्तः जातः। केन चोरितं भवेद् इदं धनम् -इति ज्ञातुम् अशक्नुवन् स राज्ञे प्रसेनजिताय सर्वं निवेदितवान्। नृपः तम् आश्वास्य गृहं प्रैषयत्।

तदनु चोरं ग्रहीतुं राज्ञा एकः उपायः चिन्तितः। स शरीरवेदनाव्याजेन शय्यागतः नगरस्य वैद्यान् आकारयत्। तेभ्यः वेदनानिवारकम् औषधं गृहीत्वा पृष्टवान्- एषु दिनेषु केषां रोगिणाम् उपचारः क्रियते भवद्भिः, किम् औषधं च दीयते तेभ्यः। तैः रोगिणाम् औषधानां नामगुणादीनां परिचयः दत्तः। एकेन वैद्येन उक्तम् यन्मया मातृदत्तनामरोगिणे नागबलायाः मूलं क्वाथरूपेण सेवितुम् आदिष्टम्। राज्ञा मातृदत्तः आहूतः पृष्टश्च नागबलामूलं कुतः प्राप्तम्? सोऽवदत्, मम सेवकः वनाद् आनीतवान्। ततः तेन सेवकः आहूतः।

राजदण्डभयात् स सेवकः निजम् अपराधं स्वीकृतवान् , मुद्राश्च प्रत्यर्पितवान्।



# यत् स्वार्थे तत् एव परेषां कृते

-सरोज गुलाटी

**( परिवारस्य जनाः भोजनं कुर्वन्ति )**

**पितामहः-** (भोजनात् किञ्चित् भागं निष्काष्य स्वच्छपात्रे स्थापयति।)

**अमितः** - पितामह! भवान् प्रतिदिनम् भोजनात् पूर्वं किञ्चित् अंशं किमर्थं निष्काष्यति?

**पितामहः-** एतत् भोजनं पक्षिणां कृते अस्ति।

**अमितः** - (आश्चर्येण माता-पित्रोः मुखं पश्यति)

**पितामहः-** किमर्थम् (आश्चर्येण पितरौ पश्यति?

**अमितः** - (किञ्चित् न वदति।)

**पितामहः-** आश्यर्यं मा कुरु। अहं स्पष्टीकरोमि।

**अमितः** - (पितरं प्रति मुखं कृत्वा श्रोतुम् उत्सुकः भवति।

**पितामहः-** वत्स! अस्मिन् धरातले ये अपि प्राणिनः सन्ति तेषां जीवनार्थं एषा परम्परा युगात् प्रचलिता अस्ति।

( किञ्चित् विरम्य)

**पितामहः** - शृणु। अस्माकं परिवारे तु यदा अस्माकं माता भोजनं पचति स्म तदा प्रथमा रोटिका तु सा गवार्थमेव पाचयति स्म।

**अमितः** - (सहसा वदति) परम् अधुना तु जनाः यत् भोजनम् अवशिष्टं भवति केवलं तत् एव गवे ददति।

**पितामहः** - किम् एतत् उचितम्?

**अमितः-** (विचिन्त्य) उचितं तु न अस्ति।

**पितामहः** - पुनः शृणोतु। अन्तिमा रोटिका तु श्वानाय भवति स्म।

**अमितः-** अधुना अपि केचित् जनाः सन्ति ये श्वानाय किञ्चित् ददति। परं ते तु अवशिष्टं भोजनम् एव ददति।

**पितामहः** - एतत् कदापि न करणीयम्। यादृशं भोजनं जनाः स्वयं खादन्ति तादृशं भोजनम् एव अन्येभ्यः यच्छेत्। अस्य मूले मूलभावना तु एषा आसीत्।

**अमितः-** सत्यं कथयति भवान्।

**पितामहः** - जीवजन्तूनां जीवनार्थम् एव एषा परम्पर प्रचलिता।

**अमितः-** (चिन्तामग्नः भवति)

**पितामहः** - भोजनकाले किञ्चित् भोजनं स्थाल्यायाः निष्काष्य तेभ्यः दीयते येन ते अपि स्वजीवनं चालयितुं समर्थाः भवेयुः।

**अमितः-** (किञ्चित् न उत्तरति)

**पितामहः-** स्थाल्यायाः निष्कासितं भोजनं बहिः कुत्रापि वृक्षाणां समीपे अहं प्रतिदिनं स्थापयामि। पक्षिणः आगत्य एतत् खादन्ति।

**अमितः-** अति उत्तमः विचारः। अद्यतः अहम् अपि अनुपालयिष्यामि।



**-३४३ एस०एफ० फ्लैट,**
**अशोकविहारः, फेज-४,**
**देहली -५२**

# हरिश्चन्द्रः

**-प्रकाश कौरः**

पूरा भारतवर्षे कोऽपि धर्मात्मा, सत्यव्रती परोपकारी च राजा आसीत्। तस्य नाम हरिश्चन्द्रः। सः इक्ष्वाकुवंशे जातः आसीत्, श्रीरामस्य पूर्वजः इति अपि प्रसिद्धः। तस्य धर्मनिष्ठा एव तस्य यशस्य मूलम् आसीत्।

राजा हरिश्चन्द्रः न केवलं सत्यप्रियः आसीत्, किन्तु सत्संगप्रियः, अध्ययनशीलः, जनकल्याणे समर्पितः च आसीत्। सः नित्यं ब्राह्मणैः सह वेदशास्त्रेषु चर्चां करोति स्मः तस्य राज्यम् 'अयोध्या' इति नाम्ना प्रसिद्धम् आसीत्, यत्र प्रजाः धर्मे स्थिता, नित्यानन्दिताः च आसन्।

तस्य भार्या आसीत् तारा- पतिव्रता, गुणवती, धर्मज्ञा च। पुत्रः रोहितः अपि बाल्ये एव अत्यन्तं शीलवान्, नम्रः च, बुद्धिमान् च आसीत्। सम्पूर्णं कुलं आदर्शरूपं दृश्यते स्म।

**( विश्वामित्रस्य आगमनम् )**

एतस्मिन् समये विश्वामित्रः नाम ऋषिः आसीत्, यः तपसाऽतिपरमं बलं प्राप्तवान्। सः चिन्तयामास- ''राजा हरिश्चन्द्रः सत्यं सदा भाषते इति ख्यातिः अस्ति। किं सः कदापि असत्यं न वदति? ततः सः स्वमायया राजा हरिश्चन्द्राय स्वप्ने एकं दृश्यं दर्शितवान् -हरिश्चन्द्रः यज्ञं कृत्वा सम्पूर्णं राज्यं दानं कृतवान् इति। प्रभाते राजा स्वप्नात् जागरितः सन् चिन्तितः अभवत्। सः मनसि स्वयं चिन्तयति-''स्वप्ने अपि मया यदि किमपि दत्तं, तर्हि तत् असत्यं त्यक्तुं न शक्यते। अहं सत्यस्य सेवकः।'' ततः विश्वामित्रः आगत्य यथार्थं दानं याचितवान् - ''राजन्। त्वं यज्ञे मम सम्पूर्णं राज्यं दत्तवान्, अतः मम यज्ञाय तव राज्यं समर्पय।''

राजा हर्षं न प्रकटयामास, न दुःखं। केवल मन्दं स्मित्वा उक्तवान् -

''यथास्तु। मम वचनं धर्मं अनुवर्तते।'' ततः सः राज्यं, रत्नानि, सुवर्णं, वस्त्राणि रथं, अस्त्रशस्त्राणि, सर्वं दत्तवान्।

**( वनगमनं व वाराणसी-प्रवासः )**

राजा तारा-सहितः, रोहितं गृहीत्वा राज्यात् निर्गतः। वस्त्रद्वयं एव शेषम्। मार्गे प्रजाः रुदन्त्यः, विनम्रतया शीर्षं नमयन्त्यः-

''सत्यस्य प्रतापः एषः। धन्योऽयं राजा।'' वाराणस्यां गत्वा सः चाण्डालस्य सेवकः अभवत्। तस्य कार्यम् आसीत् मृतदेहानां अन्त्यसंस्कारः। अतिदुःखेन अपि सः कार्यं कर्तुं प्रारब्धवान्। तस्य भार्या तारा एका धनिकगृहिण्याः दासी अभवत्। सा स्वामिन्याः चरणयोः सेवां कुर्वन्ती दुःखेन अपि धर्मात् न च्युतः। रोहितः अरण्ये भ्रमन्, कन्दमूलानि संग्रह्य मातरं पालयति स्म। सर्वे त्रयः विविधदुःखानि सहयित्वा धर्मपथं न त्यक्तवन्तः।

**( बलीदानप्रसङ्गः )**

किञ्चिद् दिनान्तरे नगरस्य उच्छिष्टे सर्पाणां उत्पातः जातः। ब्राह्मणाः होमाय मानवबलीं याचितवन्तः। विश्वामित्रः यः पूर्वमेव क्रुद्धः आसीत्, रोहितं बलिदानाय निर्दिष्टवान्। हरिश्चन्द्रः अत्यदुःखितः अपि स्वपुत्रं बलीं दातुं मनसि अङ्गीकृतवान् -

'यदि धर्मरक्षणार्थाय बलिः आवश्यकः, अहं तत् करिष्यामि।'

रोहितः वनं पलायितः। तत्र नागदंषेण मृतः अभवत्। तारा, रात्रौ पुत्रदेहं श्मशानं नीतवती।

**( धर्मस्य परिक्षा चरमे स्थले )**

श्मशाने हरिश्चन्द्रः आसीत्। तेन शुल्कं याचितम्। तारा स्वकण्ठात् काञ्चनमालां अपाहर्य दातुं यत्नं कृतवती। तदा सः पत्न्याः मुखं दृष्ट्वा स्तब्धः अभवत्। एषा तारा। एषः मम रोहितः!'

राजा अश्रुपूर्णदृशा पत्न्यं आलोक्य, किंचिदपि न उक्तवान्। केवलं शुल्कं न प्राप्य अन्त्यसंस्कारं न कृतवान्।

**( दिव्यप्रकटिः च पुनरुत्थानम् )**

तदा आकशात् देवाः प्रकटितवन्तः। इन्द्रः, वरुणः, अग्निः, यमः च। विश्वामित्रः अपि हसन् आह–'राजन्। अस्माकं परीक्षा सफलतया समाप्ता। त्वं सत्यस्य, धर्मस्य, धैर्यस्य मूर्तिमान् दृष्टान्तः।' ते रोहितं जीवितं कृतवन्तः। स्वर्गात् पुष्पवृष्टिः अभवत्। विश्वामित्रः राज्यम् प्रत्यर्प्य, आशीर्वादं दत्त्वा तपोवनं गतः। राजा हरिश्चन्द्रः पुनः अयोध्यां गत्वा धर्मेण राज्यं पालयति स्म। सः इतिहासे सत्यस्य प्रतिमानः इव प्रसिद्धः जातः।

**सत्यस्य मार्गः क्लिष्टः, किन्तु फलदायकः।**
**धर्मे स्थितः कदापि पतति न।**
**सत्यमेव जयते नानृतं।**
**परिक्षासु अपि सत्यं न वर्जनीयम्**
**प्रतिकूलतायामपि धर्मं न त्यजेत्।**



**- गृह संख्या-४९ पी, सैक्टर-१४**
**रोहतक-१२४००१, हरियाणा प्रदेशः**

# प्रतीक्षायाः पुस्तके

-डॉ. धनञ्जयकुमारमिश्रः

प्रत्यहं प्रभाते
नवं पृष्ठं उद्घाटयामि
प्रतीक्षायाः पुस्तके -
तव नाम्ना चिह्नितं,
तव अभावेन रचितम्।

प्रथमपृष्ठे
तव गमनस्य मौनम्,
द्वितीये
तव प्रतिज्ञायाः गन्धः,
तृतीये
सा सन्ध्या स्मृतिर्दुर्बला-
यदा त्वं न पृष्ठतः अपश्यः।




एते प्रतीक्षायाः पृष्ठाः
न केवलं अक्षरैः पूर्णाः,
किन्तु स्वप्नभङ्गैः,
कम्पमानश्वासैः,
च अपूर्णाभिलाषरेखाभिः अपि।

कदाचित् कश्चन दिवसः
तव स्मितं लेखयति
एषु पृष्ठेषु -
न स्यायं, न शब्दैः,
किन्तु केवलं स्पर्शेन,
कदाचित् रात्रिः
रिक्तं पृष्ठं यच्छति -

यत्र मम चित्तम्
त्वन्मात्रं नाम लिखति,
पुनः पुनः... शनैः शनैः...।

प्रतीक्षा
नूनं न केवलं आदत्तिः,
किन्तु एका लिपिरेव जाताऽस्ति -
यत्र मम सर्वमस्तित्वं
त्वामेव निरन्तरं लिखति।




प्रत्येकक्षणं
एको अनुच्छेदस्तव,
प्रत्येकश्वासः
विरामचिह्नं।
त्वं नासि,
तथापि तव विना
एष ग्रन्थः न तु अपूर्णः -
यतः तव अभावः एव
अस्य कथाकेन्द्रभूतः जातः।

प्रतीक्षायाः पृष्ठाः
इदानीं जीवनपृष्ठरूपे परिणमिताः -
येषां प्रतिदिनं पठनं
त्वया संवादं इव भवति।

**-विभागाध्यक्षः, संस्कृत**
**सि.का.मु.वि.वि.दुमका**
**झारखण्डः**

सुरुचिपूर्ण मासिक बाल संस्कृत पत्रिका

## "संस्कृत-चन्द्रिका"

नैतिक-मूल्यों के साथ-साथ
सम्पूर्ण देश के वरिष्ठ-बाल-साहित्यकारों तथा नवोदित प्रतिभाओं
की लेखनी की संयुक्त प्रस्तुति

## "संस्कृत-चन्द्रिका"

( आई.एस.एस.एन.-2347—1565 )

**संस्कृत भाषा के प्रचार-प्रसार हेतु प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा सरल संस्कृत-भाषा में प्रकाशित एक ऐसी सुरुचिपूर्ण एवं ज्ञान-विज्ञान तथा नैतिक शिक्षा की मासिक बाल पत्रिका जो प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।**

**मूल्यः- एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु. २५०/- मात्र**

**सुरुचि सम्पन्न स्वस्थ एवं सकारात्मक अभिव्यक्ति की संवाहिका**

## "संस्कृत-चन्द्रिका"

**के स्थायी अध्येता बनें।**

**आज ही अपना वार्षिक सदस्यता शुक्ल दिल्ली संस्कृत अकादमी के नाम से दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट अथवा अकादमी के बैंक खाते सं. 01701040002562285, आई.एफ.सी. कोड-** IBKL 0000170 (IDBI BANK- Preet Vihar) **में ऑन लाईन भेज कर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।**

पत्र व्यवहार का पता -

**सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**
**प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**
**दूरभाष सं.- ०११-२०९२०३६३**

RNI No.
DELSAN/2002/8921

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी
के स्वामित्व में अकादमी के कार्यालय प्लाट सं.-५,
झण्डेवालान, करोलबाग, नई दिल्ली-११०००५
से प्रकाशित